# Sumadhura Ashtakam

# સુમધુરાષ્ટકમ્

## Document Information

Text title : Sumadhura Ashtakam

File name : sumadhurAShTakam.itx

Category : aShTaka, vishhnu, jagannatha, vishnu, pradIptakumArananda, krishna

Location : doc_vishhnu

Author : (Copyright) Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

Transliterated by : Pradipta Kumar Nanda

Proofread by : Pradipta Kumar Nanda

Acknowledge-Permission: (Copyright) Pradipta Kumar Nanda

Latest update : January 7, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 7, 2021

*sanskritdocuments.org*

Sumadhura Ashtakam

# સુમધુરાષ્ટકમ્

તુલસી મધુરા દયણા મધુરા
રસના મધુરા કવિતા મધુરા ।
મધુરા નગરી મધુરેશપુરી
બડઠાકુર તે પલભા મધુરા ॥ ૧॥

નેત્રે મધુરે હાસ્યં મધુરં
યાત્રા મધુરા ઘોષો મધુરઃ ।
ચલનં મધુરં વદનં મધુરં
કરુણાકર તે વસનં મધુરમ્ ॥ ૨॥

મુકુટો મધુરઃ કપટં મધુરં
દૃષ્ટિર્મધુરા સૃષ્ટિર્મધુરા ।
રસનં મધુરં વસનં મધુરં
ભુવનેશ્વર તે નિકટં મધુરમ્ ॥ ૩॥

કૂલં મધુરં શીલં મધુરં
યવનો મધુરો ભુવનં મધુરમ્ ।
મધુરં મધુરં પ્રણમામિ સુરં
મધુમાધવ તે નિખિલં મધુરમ્ ॥ ૪॥

યાનં મધુરં માનં મધુરં
વેશો મધુરઃ કેશો મધુરઃ ।
ગૃહિણી મધુરા વિપણી મધુરા
પુરુષોત્તમ તે રમણં મધુરમ્ ॥ ૫॥

લીલા મધુરા શાલા મધુરા
વિમલા મધુરા કમલા મધુરા ।
અશનં મધુરં શયનં મધુરં
કમલાવર તે કવનં મધુરમ્ ॥ ૬॥

હારો મધુરો વેરં મધુરં
ચિકુરો મધુરો રસિતં મધુરમ્ ।
વિધુરં મધુરં ત્વરિતં મધુરં
પરમેશ્વર તે ચરિતં મધુરમ્ ॥ ૭॥

શ્રવણં મધુરં ભજનં મધુરં
ક્વણિતં મધુરં ભણિતં મધુરમ્ ।
વિષયો મધુરો હૃદયં મધુરં
મધુસૂદન તે ભ્રમણં મધુરમ્ ॥ ૮॥

ઇતિ પ્રદીપ્તનન્દશર્મવિરચિતં સુમધુરાષ્ટકં સમ્પૂર્ણમ્ ।

Composed, encoded, and proofread by
Dr. Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

*Sumadhura Ashtakam*
pdf was typeset on January 7, 2021

Please send corrections to *sanskrit@cheerful.com*